लोकप्रियसाहित्यग्रन्थमाला-४३

पं. प्रेमनारायणद्विवेदिरचनावलिः

चतुर्थो भागः

# विविधकाव्यसङ्ग्रहः

प्रधानसम्पादकः

प्रो. परमेश्वरनारायणशास्त्री

कुलपतिः

सम्पादकः

डॉ. ऋषन्भारद्वाजः ( ऋषभः )

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )

नवदेहली

लोकप्रियसाहित्यग्रन्थमाला-83

# पं. प्रेमनारायणद्विवेदिरचनावलिः

## चतुर्थो भागः

# विविधकाव्यसङ्ग्रहः

प्रधानसम्पादकः

प्रो. परमेश्वरनारायणशास्त्री

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

सम्पादकः

डॉ. ऋषन्भारद्वाजः ( ऋषभः )

संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः

सागरम्( म.प्र. )

राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः

राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )

नवदेहली

# प्रास्ताविकम्

साहित्याचार्य डॉ. प्रेमनारायणद्विवेदिमहाभागस्य जन्म मध्य-प्रदेशस्य सागर नगरे पुरव्याऊटौरी इत्यत्र 1979 तमे वैक्रमेब्दे ज्येष्ठमासे शुक्लपक्षे एकादश्यां तिथौ सोमवासरे तदनुसारं 05.06.1922 ई. तमे दिनाङ्के जातम्। अस्य पितुर्नाम पं. परमानंद द्विवेदी मातुश्च नाम श्रीमती रुक्मिणी देवी। अनेन महानुभावेन वाराणसीतो व्याकरणशास्त्री कोलकातातः काव्यतीर्थ, सागर विश्वविद्यालयतः स्नातक-स्नातकोत्तर-विद्यावारिधि परीक्षाश्च समुत्तीर्णाः। वाराणस्यां श्री द्विवेदिनो गुरवः पं. रघुनाथशर्माण आसन्। 1940 तमे खैष्टेब्देऽस्य विवाहः सागर जनपदान्तर्गत सीहोराग्रामवासिनः पं. भगवानदासतिवारीमहाभागस्य सुपुत्र्या द्रौपदी देव्या सह सञ्जातः।

श्रीद्विवेदिमहोदयः 1942 तमे वर्षे भारतछोड़ो आन्दोलनस्य सभासु समूहयात्रासु च सक्रियसहभागितामकरोत्। 1943 तमे वर्षेऽनेन काशीं गत्वा व्याकरणशास्त्रिप्रथमखण्डपरीक्षोत्तीर्णा 1944 तमे वर्षे च व्याकरणशास्त्रि द्वितीयखण्डपरीक्षासमुत्तीर्णा। तदनु खुरईस्थे संस्कृतविद्यालयेऽध्यापनकार्यं प्रारब्धं किन्तु वाराणस्यां पञ्चदशरुप्यकाणां छात्रवृत्तिलाभे अनेन क्वीन्स कालेजे महावैयाकरण पं. रघुनाथशर्मणः सान्निध्येऽध्ययनं प्रारब्धम्। किन्तु किञ्चित्कालान्तरं व्याकरण-सदृशरुक्षविषयस्याध्ययनादुपरामोऽभवत् वैराग्यग्रहणस्य च विचारोऽभूत। 1945 तमे वर्षे जनवर्यां कनखलनगरे स्वामिकृपालवानन्दात् संन्यासदीक्षां गृहीत्वा मुनिमण्डलाश्रममध्यवसत्। वैराग्यं श्रितो द्विवेदिमहाभागो हरद्वारोज्जयिनी-पटियाला-भटिण्डा-वृदावन-जगन्नाथपुरी-अयोध्या-काशी- गङ्गासागर-चित्रकूट-फर्रूखाबाद-रायबरेली- फतेहपुर-प्रयाग-कानपुर- छपरा-काठमाण्डु-प्रभृतिस्थानानां भ्रमणं कृत्वा 1949 तमे वर्षे स्वपितुर्दर्शनार्थं सागरनगरं प्राप्तः। पितुर्वचनाद्

# अनुक्रमः


पुरोवाक् — *v*
ग्रन्थकर्तुः परिचयः — *vii*
प्रास्ताविकम् — *ix*

**प्रथमखण्डः – रहीमकाव्यसुषमा**

1. निवेदनम् — 3
2. दोहावली — 8
3. रहीम-सोरठा — 32
4. रहीमशृङ्गारसोरठा — 33
5. रहिमन-वरवै — 34
6. नगरशोभा — 43
7. घनाक्षरी-छन्दांसि — 47

**द्वितीयखण्डः – अश्रुकाव्यम्**

1. अश्रुकाव्यम् ( आँसू ) — 53

**तृतीयखण्डः – स्फुटकाव्यानि**

1. मीरागीतानि — 71
2. सुन्दरदास-कवित्तानि — 80
3. जगन्नाथ-कवित्तानि — 95

छायापथं प्रयास्यन्ति निःश्वासा मलयाऽनिलैः ।
विकीर्य चान्तिमा रश्मीस्तिरोयास्यति चन्द्रमाः ।।94।।

द्योतिष्ये धूलिखण्डेषु चोत्पतिष्यामि सौरभैः ।
कुत्रापि त्वामवाप्स्यामि सम्पत्स्ये ग्रहपद्धतिम् ।।95।।

ईदृशी क्षमता कास्मिन् यान्त्रिके चलजीवने ।
जागर्ति ज्योतिषा पूर्णा ममता ते सचेतना ।।96।।

शीतलैः किरणै रम्यो हिमांशुर्हृदय स्थितः ।
चकोरोऽश्नाति चाङ्गारान् सौन्दर्यामृतसम्प्लुतः ।।97।।

दाहसामर्थ्यमादाय दीपः शलभमामिलत् ।
ज्वलनस्य दशायां तु सोऽस्फुटत् पुष्पसन्निभः ।।98।।

यूथिकोपवने व्योम्नि जातिपुष्पाणि तारकाः ।
सिताम्भोजसमश्चन्द्र गत्वा त्वं मिलितः कथम् ।।99।।

नैनां सफलतां ब्रूहि कलिका लघुजीवने ।
मधुपूर्णा हसेयुर्वा त्रोटिताः स्युर्बलादिव ।।100।।

व्यतीयात् कोमले वृन्ते चेन्मुहूर्ताय जीवनम् ।
का हानिर्यदि तूष्णीं त्वं जीवन् पतसि भूतले ।।101।।

पादयोरर्पिता चैषा मनोरथसुमाञ्जलिः ।
मर्दय कीटवन्नैव मधु चास्ति कणेष्वपि ।।102।।

गतमोहस्य कालस्य लेखः श्यामपटेऽस्फुटः ।
सुखदुःखमयी रेखा लिखिता पठिता स्थिरा ।।103।।

लयं यास्यति संसारः प्रपतन् सुखदुःखयोः ।
नेक्षिष्यते परावृत्य कस्यापि स हिताहिते ।।104।।

जनजीवनवेद्यां च वियोगमिलनोद्वहः ।
नर्तनं सुखदुःखानां क्रीडाक्ष्णोर्मनसस्तथा ।।105।।

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058